This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥श्रीगणेशायनमः॥ ॥अथातोब्रह्मजिज्ञासा॥१॥जन्माद्यस्ययतः
॥२॥शास्त्रयोनित्वात्॥३॥तत्तुसमन्वयात्॥४॥ईक्षतेर्नाशब्दं॥गौण
श्चेन्नात्मशब्दात्॥२॥तन्निष्ठस्यमोक्षोपदेशात्॥३॥हेयत्वावचना
च्च॥४॥स्वाप्ययात्॥५॥गतिसामान्यात्॥६॥५॥आनंदमयो
ऽभ्यासात्॥१॥विकारशब्दान्नेतिचेन्नप्राचुर्यात्॥२॥तद्धेतुत्वव्य
पदेशाच्च॥३॥मांत्रवर्णिकमेवचगीयते॥४॥नेतरोऽनुपपत्तेः॥५॥
प भेदव्यँदेशाच्च॥६॥कामाच्चनानुमानापेक्षा॥७॥अस्मिन्नस्यच
तद्योगंशास्ति॥८॥६॥अंतस्तद्धर्मोपदेशात्॥१॥भेदव्यपदेशाच्चा
न्यः॥२॥७॥आकाशस्तल्लिंगात्॥८॥अतएवप्राणः॥१॥ ९॥ज्योति

Acc. No. 1457M1744
Title - ब्रह्मसूत्र (सूत्रपाठ)
Author - ~~[illegible]~~ बादरायण.
Date - ?
Sub - वेदान्त
folio - 18
Xerox - 35

KKSU LIBRARY
RAMTEK
441 106
M-1744
Dist. Nagpur

Checked 2012

श्चरणाभिधानात्॥१॥छंदोभिधानान्नेतिचेन्न तथाचेर्पणनिग तो
दात्तथाहिदर्शनं॥२॥भूतादिपादव्यपदेशोपपत्तेश्चैवं॥३॥उपदे
शभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधात्॥४॥१०॥प्राणस्तथा
नुगमात्॥१॥नवक्तुरात्मोपदेशादिंचेदध्यात्मसंबंधभूमाह्य ति
स्मिन्॥२॥शास्त्रदृष्ट्यातूपदेशोवामदेववत्॥३॥जीवमुख्यप्रा
णलिंगान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात्॥
॥४॥११॥इतिप्रथमाध्यायस्यप्रथमःपादः॥ ॥सर्वत्रप्रसिद्धोप
देशात्॥१॥विवक्षितगुणोपपत्तेश्च॥२॥अनुपपत्तेस्तुनशारीरः
॥३॥कर्मकर्तृव्यपदेशाच्च॥४॥शब्दविशेषात्॥५॥स्मृतेश्च॥६

अर्भकौकस्त्वात्तद्व्यपदेशाच्चनेतिचेन्ननिचाय्यत्वादेवंव्योमवच्च
॥७॥संभोगप्राप्तिरितिचेन्नवैशेष्यात्॥८॥१॥अत्ताचराचरग्रह
णात्॥१॥प्रकरणाच्च॥२॥॥३॥गुहांप्रविष्टावात्मानौहितद्दर्शनात्॥१॥
विशेषणाच्च॥२॥३॥अंतरउपपत्तेः॥१॥स्थानादिव्यपदेशाच्च॥२॥
सुखविशिष्टाभिधानादेवच॥३॥श्रुतोपनिषत्कगत्यभिधानाच्च॥
॥४॥अनवस्थितेरसंभवाच्चनेतरः॥५॥४॥अंतर्याम्यधिदैवादि
षुतद्धर्मव्यपदेशात्॥१॥नचस्मार्तमतद्धर्माभिलापात्॥२॥शा
रीरश्चोभयेहिभेदेनैनमधीयते॥३॥५॥अदृश्यत्वादिगुणकोध
र्मोक्तेः॥१॥विशेषणभेदव्यपदेशाच्चनेतरौ॥२॥रूपोपन्यासाच्च॥३॥६

वैश्वानरसाधारणशब्दविशेषात्॥१॥स्मर्यमाणमनुमानंस्यादिति॥२॥
शब्दादिभ्योंतःप्रतिष्ठानान्नेतिचेन्नतथादृष्ट्युपदेशादसंभवात्पुरुष
मपिचैनमधीयते॥३॥अतएवनदेवताभूतंच॥४॥साक्षादप्यविरोधं
जैमिनिः॥५॥अभिव्यक्तेरित्याश्मरथ्यः॥६॥अनुस्मृतेर्बादरिः॥७॥
संपत्तेरितिजैमिनिस्तथाहिदर्शयति॥८॥आमनंतिचैनमास्मिन्॥९॥
॥७॥इतिप्रथमाध्यायस्यद्वितीयपादः॥ ॥द्युभ्वाद्यायतनंस्वशब्दात्॥१॥
मुक्तोपसृप्यव्यपदेशात्॥२॥नानुमानमतच्छब्दात्॥३॥प्राणभृच्च॥४॥
भेदव्यपदेशाच्च॥५॥प्रकरणात्॥६॥स्थित्यदनाभ्यांच॥७॥ ॥१॥भूमासंप्र
सादादध्युपदेशात्॥१॥धर्मोपपत्तेः॥२॥२॥अक्षरमंबरांतधृतेः॥१॥

सा च प्रशासनात् ॥२॥ अन्यभावव्यावृत्तेश्च ॥३॥ ॥३॥ ईक्षतिकर्मव्यपदेशा
त्सः ॥१॥४॥ दहर उत्तरेभ्यः ॥१॥ गतिशब्दाभ्यां तथा हि दृष्टं लिंगं च ॥२॥
धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः ॥३॥ प्रसिद्धेश्च ॥४॥ इतरपराम
र्शात्स इति चेन्नासंभवात् ॥५॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥६॥
अन्यार्थश्च परामर्शः ॥७॥ अल्पश्रुतेरिति चेत्तदुक्तं ॥८॥५॥ अनु
कृतेस्तस्य च ॥१॥ अपि च स्मर्यते ॥२॥६॥ शब्दादेव प्रमितः ॥१॥ हृ द
यपेक्षया तु मनुष्याधिकारत्वात् ॥२॥७॥ तदुपर्यपि बादरायणः संभ
वात् ॥१॥ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥२॥ शब्द इति
चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां ॥३॥ समाननामरूपत्वाच्चावृत्ता

राम
३

वप्यविरोधोदर्शनात्स्मृतेश्च॥४॥८॥मध्वादिष्वसंभवादनधिकारंजैमि
निः॥१॥ज्योतिषिभावाच्च॥२॥भावंतुबादरायणोस्तिहि॥३॥९॥
शुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहि॥क्षत्रियत्वगतेश्चोत्त
रत्रचैत्ररथेनलिंगात्॥२॥संस्कारपरामर्शात्तदभावाभिलापाच्च॥३॥
तदभावनिर्द्धारणेचप्रवृत्तेः॥४॥श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च य
॥५॥१०॥कंपनात्॥१॥११॥ज्योतिर्दर्शनात्॥१॥१२॥आकाशोर्थांतरत्वादि
व्यपदेशात्॥१३॥सुषुप्त्युत्क्रांत्योर्भेदेन॥१॥पत्यादिशब्देभ्यः॥२॥१४॥
इतिप्रथमाध्यायस्यतृतीयःपादः॥ ॥आनुमानिकमप्येकेषामितिचे
न्नशरीररूपकविन्यस्तगृहीतेर्दर्शयतिच॥१॥सूक्ष्मंतुतदर्हत्वात्॥२॥ त

तदधीनत्वादर्थवत्॥३॥ज्ञेयत्वावचनाच्च॥४॥वदतीतिचेन्नप्राज्ञोहिप्रक
रणात्॥५॥त्रयाणामेवचैवमुपन्यासःप्रश्नश्च॥६॥महद्वच्च॥७॥१॥चम
सवदविशेषात्॥१॥ज्योतिरूपक्रमातुतथाह्यधीयतएके॥२॥कल्पनो
पदेशाच्चमध्वादिवदविरोधः॥३॥२॥नसंख्यापसंग्रहादपिनानाभावा
दतिरेकाच्च॥१॥प्राणादयोवाक्यशेषात्॥२॥ज्योतिषैकेषामसत्यन्ने॥३॥३॥
कारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेः॥१॥समाकर्षात्॥२॥४॥
जगद्वाचित्वात्॥१॥जीवमुख्यप्राणलिंगान्नेतिचेत्तद्व्याख्यातं॥२॥अ
न्यार्थंतुजैमिनिःप्रश्नव्याख्यानाभ्यामपिचैवमेके॥३॥५॥वाक्यान्वयात्॥१॥
प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः॥२॥उत्क्रमिष्यतएवंभावादित्यौडुलोमिः॥३॥

अवस्थितेरितिकाशकृत्स्नः ॥४॥६॥ प्रकृतिश्चप्रतिज्ञादृष्टांतानुपरो
धात् ॥१॥ अभिध्योपदेशाच्च ॥२॥ साक्षाच्चोभयाम्नानात् ॥३॥ आ
त्मकृतेः परिणामात् ॥४॥ योनिश्चहिगीयते ॥५॥७॥ एतेनसर्वेव्या
ख्याताव्याख्याताः ॥८॥ इतिश्रीब्रह्मसूत्रपदयोजनायांप्रथमाध्या
यः ॥१॥ ॥ॐ तत्सत् ॥ ॥स्मृत्यनवकाशदोषप्रसंगइतिचे
न्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥१॥ एतेनयोगः प्रयुक्तः ॥२॥
नविलक्षणत्वादस्यतथात्वंचशब्दात् ॥१॥ अभिमानिव्यपदेशस्तु
विशेषानुगतिभ्यां ॥२॥ दृश्यतेतु ॥३॥ असदितिचेन्नप्रतिषेधमात्र
त्वात् ॥४॥ अपीतौतद्वत्प्रसंगादसमंजसं ॥५॥ नतुदृष्टांतभावा
त् ॥६॥ स्वपक्षदोषाच्च ॥७॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति

चेदेवमप्यनिर्मोक्षप्रसंगः॥८॥३॥ एतेनशिष्टापरिग्रहा अपिव्याख्या
ताः॥१॥४॥ भोक्तापत्तेरविभागश्चेत्स्याल्लोकवत्॥१॥५॥ तदनन्य
त्वमारंभणशब्दादिभ्यः॥१॥ भावेचोपलब्धेः॥२॥ सत्वाच्चापरस्य॥३॥
असद्व्यपदेशान्नेतिचेन्नधर्मांतरेणवाक्यशेषात्॥४॥ युक्तेःशब्दां
तराच्च॥५॥ पटवच्च॥६॥ यथाचप्राणादिः॥७॥६॥ इतरव्यपदेशाद्धि
ताकरणादिदोषप्रसक्तिः॥१॥ अधिकंतुभेदनिर्देशात्॥२॥ अ
श्मादिवच्चतदनुपपत्तिः॥३॥७॥ उपसंहारदर्शनान्नेतिचेन्नक्षीरव
द्धि॥१॥ देवादिवदपिलोके॥२॥८॥ कृत्स्नप्रसक्तिर्निरवयवत्वशब्द
व्याकोपोवा॥१॥ श्रुतेस्तुशब्दमूलत्वात्॥२॥ आत्मनिचैवंविचित्राश्च

राम
५

9

हि॥३॥स्वपक्षदोषाच्च॥४॥९॥ ॥सर्वोपेताचतद्दर्शनात्॥१॥विचित्र
करणत्वान्नेतिचेत्तदुक्तं॥२॥१०॥नप्रयोजनवत्वात्॥१॥लोकवत्तु
लीलाकैवल्यं॥२॥११॥वैषम्यनैर्घृण्येनसापेक्षत्वात्तथाहिदर्श
यति॥१॥नकर्माविभागादितिचेन्नानादित्वात्॥२॥१२॥ ॥सर्व
धर्मोपपत्तेश्च॥१॥१३॥इतिद्वितीयाध्यायस्यप्रथमःपादः॥ ॥
रचनानुपपत्तेश्चनानुमानं॥१॥प्रवृत्तेश्च॥२॥पयोंबुवच्चेत्तत्रापि॥३॥
व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥४॥अन्यत्राभावाच्चनतृणा
दिवत्॥५॥अभ्युपगमेप्यर्थाभावात्॥६॥पुरुषाश्मवदितिचे
त्तथापि॥७॥अंगित्वानुपपत्तेश्च॥८॥अन्यथानुमितौचज्ञशक्ति

वियोगात्॥९॥विप्रतिषेधाच्चासमंजसं॥१०॥१॥ ॥महद्दीर्घवद्वाह्रस्वप
रिमंडलाभ्यां॥१॥ ॥२॥उभयथापिनकर्मातस्तदभावः॥१॥समवा
याभ्युपगमाच्चसाम्यादनवस्थितिः॥२॥नित्यमेवचभावात्॥३॥रू
पादिमत्वाच्चविपर्ययोदर्शनात्॥४॥उभयथाचदोषात्॥५॥अपरि
ग्रहाच्चात्यंतमनपेक्षा॥६॥३॥ ॥समुदायउभयहेतुकेपितदप्राप्तिः॥१॥
इतरेतरप्रत्ययत्वादितिचेन्नोत्पत्तिमात्रनिमित्तत्वात्॥२॥उत्तरो राम
त्पादेचपूर्वनिरोधात्॥३॥असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथा॥४॥ ६
प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्॥५॥उभयथाचदोषात्॥६॥
भा आकाशेचाविशेषात्॥७॥नासतोदृष्टत्वात्॥८॥उदासीनानामपि

चैवंसिद्धिः॥९॥४॥ ॥नाभावउपलब्धेः॥१॥वैधर्म्याच्चनस्वप्ना
दिवत्॥२॥नभावोनुपलब्धेः॥३॥क्षणिकत्वाच्च॥४॥सर्वथानु
पपत्तेश्च॥५॥५॥ ॥नैकस्मिन्नसंभवात्॥१॥एवंचात्माका
र्त्स्न्यं॥२॥नचपर्यायादप्यविरोधोविकारादिभ्यः॥३॥अन्त्याव
स्थितेश्चोभयनित्यत्वादविशेषः॥४॥६॥पत्युरसामंजस्यात्॥१॥
संबंधानुपपत्तेश्च॥२॥अधिष्ठानानुपपत्तेश्च॥३॥करणवच्चे
व न्नभोगादिभ्यः॥४॥अंतत्वमसर्वज्ञतावा॥५॥७॥उत्पत्त्यसंभ
वात्॥१॥विज्ञानादिभावेवातदप्रतिषेधः॥२॥विप्रतिषेधाच्च॥३॥८॥
द्वितीयाध्यायस्यद्वितीयपादः॥२॥ ॥नवियदश्रुतेः॥१॥अस्तितु॥२॥

गौण्यसंभवात्॥३॥शब्दाच्च॥स्याच्चैकस्यापिब्रह्मशब्दवत्॥५॥
विकारापेक्षायातदुपपत्तेः॥६॥प्रतिज्ञाहानिरव्यतिरेकाच्चशब्दे
भ्यः॥७॥यावद्विकारंतुविभागोलोकवत्॥८॥१॥ ॥एतेनमा
तरिश्वाव्याख्यातः॥१॥२॥ ॥असंभवस्तुसतोऽनुपपत्तेः॥३॥ ॥
तेजोतस्तथाह्याह॥४॥आपः॥५॥पृथिव्याधिकाररूपशब्दां
तरेभ्यः॥१॥६॥तदभिधानादेवतुतल्लिंगात्सः॥७॥विपर्यये
णतुक्रमोतउपपद्यतेच॥८॥अंतराविज्ञानमनसीक्रमेणत
ल्लिंगादितिचेन्नाविशेषात्॥९॥चराचरव्यपाश्रयस्तुस्यात्तद्व
पदेशोभाक्तस्तद्भावभावित्वात्॥१०॥नात्माश्रुतेर्नित्यत्वाच्चताभ्यः॥११॥

राम
७

ज्ञोतएव ॥१२॥ उत्क्रांतिगत्यागतीनां ॥१३॥१॥ स्वात्मनाचोत्तरयोः ॥२॥
णु नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात् ॥३॥ स्वशब्दोन्मानाभ्यां
च ॥४॥ अविरोधश्चंदनवत् ॥५॥ अवस्थितिवैष्यादितिचेन्नाभ्यु
पगमाद्धृदिहि ॥६॥ गुणाद्वालोकवत् ॥७॥ व्यतिरेकोगंधव
त् ॥८॥ तथाचदर्शयति ॥९॥ पृथगुपदेशात् ॥१०॥ तद्गुणसा
रत्वात्तुतद्व्यपदेशः प्राज्ञवत् ॥११॥ यावदात्मभावित्वाच्चनदो
षस्तद्दर्शनात् ॥१२॥ पुंस्त्वादिवत्त्वस्यसतोभिव्यक्तियोगात् ॥१३॥
नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमोवान्यथा ॥१४॥१३॥
॥ ॥कर्त्ताशास्त्रार्थवत्वात् ॥१॥ विहारोपदेशात् ॥२॥ उपादाना

स्मरंतिच॥३॥अनुज्ञापरिहारौदेहसंबंधाज्ज्योतिरादिवत्॥४
असंततेश्चाव्यतिकरः॥५॥

तू॥३॥व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्ययः॥४॥उपलब्धि
वदनियमः॥५॥शक्तिविपर्ययात्॥६॥समाध्यभावाच्च॥७॥१४॥ पा
॥ ॥यथाचतक्षोभयथा॥१५॥परात्तुतच्छ्रुतेः॥१॥कृतप्रयत्ना
पेक्षस्तुविहितप्रतिषिद्धावैयर्थ्यादिभ्यः॥२॥१६॥अंशोनाना
व्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएके॥१॥प्रका राम
शादिवन्नैवंपरः॥५॥जलसूर्यवत्॥६॥अदृष्टानियमात्॥७॥ ८
अभिसंध्यादिष्वपिचैव॥८॥प्रदेशादितिचेन्नांतर्भावात्॥९॥
॥१७॥ ॥इतिब्रह्मसूत्रस्यद्वितीयेतृतीयःपादः॥३॥ ॥छ॥
तथाप्राणाः॥१॥गौण्यसंभवात्॥२॥तत्प्राक्छ्रुतेश्च॥३॥तत्पू

वैकत्वाद्वाच्यः॥४॥१॥सप्तगतेर्विशेषितत्वाच्च॥१॥हस्तादयस्तुस्थिते
तोनैवं॥२॥२॥अणवश्च॥३॥श्रेष्ठश्च॥४॥नवायुक्रियेपृथगुपदेशा
त्॥१॥चक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यः॥२॥अकरणत्वाच्चन
दोषः॥३॥पंचवृत्तिर्मनोव्यपदिश्यते॥४॥५॥ ॥अणुश्च॥६॥
ज्योतिरधिष्ठानंतुतदामननात्॥१॥प्राणवताशब्दात्॥२॥त
स्यचनित्यत्वात्॥३॥७॥ ॥तइंद्रियाणितद्व्यपदेशाद॒न्यत्र
श्रेष्ठात्॥१॥भेदश्रुतेः॥२॥वैलक्षण्याच्च॥३॥८॥ ॥संज्ञामू
र्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशात्॥१॥अनंतर्यानु॥२॥मांसा
दिभौमंयथाशब्दमितरयोश्च॥३॥वैशेष्यात्तुतद्वादस्तद्वादः॥९॥ ॥

॥ ॥इतिब्रह्मसूत्रेद्वितीयाध्यायःसमाप्तः॥ ॥ ॥ ॥ ॥
तदंनंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां॥आत्म
कत्वात्तुभूयस्त्वात्॥प्राणगतेश्च॥अग्न्यादिगतप्रमितेरिति
चेन्नभाक्तत्वात्॥प्रथमेश्रवणादितिचेन्नताएवह्युपपत्तेः॥भा
क्तंवानात्मवित्त्वात्तथाहिदर्शयति॥१॥कृतात्ययेनुशयवांदृष्ट
स्मृतिभ्यांयथेतमनेवंच॥चरणादितिचेन्नोपलक्षणार्थेतिका
र्ष्णाजिनिः॥आनर्थक्यमितिचेन्नतदपेक्षत्वात्॥सुकृतदुष्कृते
एवेतितुबादरायणिः॥२॥अनिष्टादिकारिणामपिचश्रुतं॥
कौषीतकीनःसमामनंति॥स्मरंतिच॥तत्रापिचतद्व्यापाराद

राम
१

17

विरोधः॥ विद्याकर्मणोरितितुप्रकृतत्वात्॥ तृतीयेयथोपलब्धेः
॥दर्शनाच्च॥ तृतीयशब्दावरोधःसंशोकजस्य॥३॥ साभा
व्यापत्तिरुपपत्तेः॥४॥ नातिचिरेणविशेषात्॥५॥ अन्याधि
ष्ठितेपूर्ववदभिलापात्॥ अशुद्धमितिचेन्नशब्दात्॥ रेतः
सिग्योगोथ॥ योनेःशारीरं॥६॥ इतिब्रह्मसूत्रंतृतीयेप्र
थमःपादः॥ ॥संध्येःसृष्टिराहहि॥ निर्मातारंचैकेपुत्रादयश्च
॥मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥ सूचकश्च
हिश्रुतेराचक्षतेचतद्विदः॥ पराभिध्यानात्तुतिरोहितंततो
ह्यस्यबंधविपर्ययौ॥ देहयोगाद्वासोपि॥१॥ तदभावोनाडि

षुतच्छ्रुतेरात्मनिच॥अतःप्रबोधोस्मात्॥२॥सएवतुकर्मानु
स्मृतिशब्दविधिभ्यः॥३॥मुग्धेर्धसंपत्तिःपरिशेषात्॥४॥ ॥
नस्थानतोपिपरस्योभयलिंगंसर्वत्रहि॥नभेदादितिचेन्नप्र
त्येकमतद्वचनात्॥अपिचैवमेके॥अरूपवदेवहितत्प्रधान
त्वात्॥प्रकाशवच्चावैयर्थ्यं॥आहचतन्मात्रं॥दर्शयतिचाथो राम
अपिस्मर्यते॥स्मृतिष्वपिरूपांतरनिषेधःस्मर्यते॥अतए १०
वचोपमासूर्यकादिवत्॥अंबुवदग्रहणात्तुनतथात्वं॥वृद्धि
ह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं॥दर्शनाच्च॥५॥प्र
कृतैतावत्त्वंहिप्रतिषेधतिततोब्रवीतिचभूयः॥तदव्यक्तमाहहि॥

।।अपिसंराधनेप्रत्यक्षानुमानाभ्यां।।प्रकाशादिवच्चावैशेष्यंप्र
काशश्चकर्मण्यभ्यासात्।।अतोनंतेनतथाहिलिंगं।।उभयव्यप
देशात्त्वहिकुंडलवत्।।प्रकाशाश्रयवद्वातेजस्त्वात्।।पूर्ववद्वाप्रतिषे
धाच्च।।५।।।।परमःसेतून्मानसंबंधभेदव्यपदेशेभ्यः।।सामा
न्यात्तु।।बुद्ध्यर्थःपादवत्।।स्थानविशेषात्प्रकाशादिवत्।।उपपत्ते
श्च।।तथान्यप्रतिषेधात्।।अनेनसर्वगतत्वमायामयशब्दादिभ्यः
।।७।। ।।फलमतउपपत्तेः।।श्रुतत्वाच्च।।धर्मंजैमिनिरतएव।। श्च
पूर्वंतुबादरायणोहेतुव्यपदेशात्।।८।।इतिब्रह्मसूत्रवृत्तौतृतीये
द्वितीयःपादः।। ।।२।।सर्ववेदांतप्रत्ययंचोदनाद्यविशेषात्।।

भेदान्नेतिचेन्नैकस्यामपि॥ स्वाध्यायस्यतथात्वेनहिसमाचारेधि
काराच्चसववच्चतंनियमः॥ दर्शयतिच॥१॥ ॥उपसंहारोर्थाभि
दाद्विधिशेषवत्समानेच॥२॥ ॥अन्यथात्वंशब्दादितिचेन्ना
विशेषात्॥ नवाप्रकरणभेदात्परोवरीयस्त्वादिवत्॥ संज्ञातश्चे
त्तदुक्तमस्तितुतदपि॥३॥ ॥व्याप्तेश्चसमंजसं॥४॥ ॥सर्वभेदा
दन्यत्रेमे॥५॥ ॥आनंदादयःप्रधानस्य॥ प्रियशिरस्त्वाद्यप्राप्तिरु
पचयापचयौहिभेदे॥ इतरेत्वर्थसामान्यात्॥६॥ आध्यानायप्रयो
जनाभावात्॥ आत्मशब्दाच्च॥७॥ ॥आत्मगृहीतिरितरवदुत्तरात्॥
अन्वयादितिचेत्स्यादवधारणात्॥८॥ ॥कार्याख्यानादपूर्वं॥९॥ ॥

समानएवचाभेदात्॥ चस्त्वर्थः॥१०॥संबंधादेवमन्यत्रापि॥नवाविशे
षात्॥ दर्शयतिच॥११॥संभृतिद्युव्याप्त्यपिचातः॥१२॥पुरुषविद्या
यामिवचेतरेषामनाम्नानात्॥चस्त्वर्थः॥१३॥वेधाद्यर्थभेदात्॥१४॥
हानौतूपायनशब्दशेषत्वात्कुशाछंदस्तुत्युपगानवत्तदुक्तेः॥
अपितुवाक्यशेषत्वात्॥१५॥सांपरायेकर्त्तव्याभावात्तथाह्यन्ये॥
छंदतउभयाविरोधात्॥१६॥गतेरर्थवत्त्वमुभयथाहि विरोधः॥उप
पन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्॥१७॥अनियमःसर्वेषामविरो
धःशब्दानुमानाभ्यां॥१८॥यावदधिकारमवस्थितिराधिकारि
काणां॥१९॥अक्षरधियांत्ववरोधःसामान्यतद्भावाभ्यामौपसद स

वतदुक्तं ॥२०॥ इयदामननात् ॥२१॥ अंतराभूतग्रामवत्स्वात्मनः ॥
अन्यथाभेदानुपपत्तेरितिचेन्नोपदेशांतरवत् ॥२२॥ व्यतिहा
रोविशिंषंतिहीतरवत् ॥२३॥ सैवहिसत्यादयः ॥२४॥ कामा
दीतरत्रतत्रचायतनादिभ्यः वशित्वादिवत् ॥२५॥ आदराद
लोपः ॥ उपस्थितेतस्तद्वचनात् ॥२६॥ तन्निर्द्धारणानियमस्तद्
ष्टेः पृथग्ध्यप्रतिबंधः फलं ॥२७॥ प्रदानवदेवतदुक्तं ॥२८॥ लिंग
भूयस्त्वात्तद्धिबलीयस्तदपि ॥ पूर्वकल्पः प्रकरणात्स्यात्क्रियामा
नसवत् ॥ अतिदेशाच्च ॥ विद्यैवतुनिर्धारणात् ॥ दर्शनाच्च ॥
अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववत् दृष्टश्चतदुक्ते ॥ कत्वर्थायमि

तिचेन्नवर्णसंयोगादिति॥ परेणचशब्दस्यताद्विध्यंभूयस्त्वात्त्व
नुबंधः॥२९॥ एकआत्मानः शरीरेभावात्॥ व्यतिरेकस्तद्भा
वाभावित्वान्नतूपलब्धिवत्॥३०॥ अंगावबद्धास्तुनशाखासु
प्रतिवेदं॥ मंत्रादिवद्वाविरोधः॥३१॥ भूम्नःक्रतुवज्ज्यायस्त्वंत
थाहिदर्शयति॥३२॥ नानाशब्दादिभेदात्॥ सर्वत्रगुणाश्रवणा
त्॥३३॥ काम्यास्तुयथाकामंसमुच्चीयेरन्नवापूर्वहेत्वभावा
त्॥३४॥ विकल्पोविशिष्टफलत्वात्॥३५॥ अंगेषुयथाश्रयभावः॥
शिष्टेश्च॥ समाहारात्॥ गुणसाधारण्यश्रुतेश्च॥ नवातत्सहभा
वाश्रुतेः॥ दर्शनाच्च॥३६॥ ॥इतिब्रह्मसूत्रेतृतीयेतृतीयः॥ ॥

पुरुषार्थोतः शब्दादिति बादरायणः ॥ शेषत्वात्पुरुषार्थवादो यथान्ये
ष्विति जैमिनिः ॥ आचार्यदर्शनात् ॥ तच्छ्रुतेः ॥ समन्वारंभणात् ॥ त
द्वतो विधानात् ॥ नियमाच्च ॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्द
र्शनात् ॥ तुल्यं दर्शनं ॥ असार्वत्रिकी ॥ विभागः शतवत् ॥ अ
ध्ययनमात्रवतः ॥ नाविशेषात् ॥ स्तुतयेनुमतिर्वा ॥ कामका
रेणचैके ॥ ऊर्ध्वरेतःसु च शब्दे हि ॥ १ ॥ परामर्शं जैमिनिरचोदना राम
चापवदति हि ॥ विधिर्वा धारणवत् ॥ २ ॥ स्तुतिमात्रमुपादानादिति १२
चेन्नापूर्वत्वात् ॥ भावशब्दाच्च ॥ ३ ॥ पारिप्लवार्था इति चेन्न विशे
षितत्वात् ॥ ४ ॥ अतएव चाग्नींधनाद्यनपेक्षा ॥ ५ ॥ सर्वापेक्षा च

यज्ञादिश्रुतेरश्ववत्॥ शमदमाद्युपेतःस्यात्तथापितद्विधेस्त
दंगतयातेषामवश्यानुष्ठेयत्वात्॥६॥ सर्वानुगतिश्चप्रा
णात्ययेतद्दर्शनात्॥ अवधाच्च॥ शब्दश्चातोकामकारे॥ साप्य
तएव॥७॥ विहितत्वाच्चाश्रमकर्मापि॥ सर्वथापितएवोभयलिं
गात्॥ अनभिभवंचदर्शयति॥८॥ अंतराचापितुतद्दृष्टेः॥ अत
स्त्वितरज्ज्यायोलिंगाच्च॥९॥ तद्भूतस्यतुनातद्भावोजैमिनेर
पिनियमात्तद्रूपाभावेभ्यः॥१०॥ नचाधिकारिकमपिपतना
नुमानात्तदयोगात्॥ प्रतिसमाधेयपतनस्मरणात्तदयोगात्॥११॥
बहिस्तूभयथापिस्मृतेराचाराच्च॥१२॥ स्वामिनःफलश्रुते

रित्यात्रेयः॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते॥१३॥ सह
कार्यंतरविधिः पक्षेणात्तृतीयं तद्वतो विध्यादिवत्॥ कृत्स्नभावात्तु गृ
हिणोपसंहारः॥ मौनवदितरेषामप्युपदेशात्॥१४॥ अनाविष्कुर्व कु
न्नन्वयात्॥१५॥ ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात्॥ एवंमुक्ति
फलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥१६॥ ॥इति ब्र
ह्मसूत्रे तृतीये चतुर्थः पादः॥ ॥आवृत्तिरसकृदुपदेशात्॥ लिंगा राम
च्च॥१॥ आत्मेति तूपगच्छंति ग्राहयंति च॥२॥ न प्रतीके न हि सः॥३॥ १४
ब्रह्मदृष्टिरुत्कर्षात्॥४॥ आदित्यादिमतयश्चांग उपपत्तेः॥५॥
ल आसीनः संभवात्॥ ध्यानाच्च॥ अचलत्वं चापेक्ष्य॥ स्मरंति च॥६॥
यत्रैकाग्रता तत्राविशेषात्॥७॥ आप्रयाणात्तत्रापि हि दृष्टं॥८॥ ॥

तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशात्॥९॥इतर
स्याप्येवमसंश्लेषःपातेतु॥१०॥अनारब्धकार्येएवतुपूर्वेएत
दवधेः॥११॥अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात्॥अतो
न्यापिह्येकेषामुभयोः॥१२॥यदेवविद्ययेतिहि॥१३॥भोगे
नत्वितरेक्षपयित्वासंपद्यते॥१४॥इतिब्रह्मसूत्रेचतुर्थाध्याये
प्रथमःपादः॥ ॥६९॥वाङ्मनसिदर्शनाच्छब्दाच्च॥अतएवस
र्वाण्यनु॥१॥तन्मनःप्राणउत्तरात्॥२॥सोध्यक्षेतदुपगमादि
भ्यः॥भूतेषुतच्छ्रुतेः॥नैकस्मिन्दर्शयतोहि॥३॥समानाचा
सृत्युपक्रमादमृतत्वंचानुपोष्य॥४॥तदापीतेःसंसारव्यपदेशात्॥

सूक्ष्मंप्रमाणतश्चतथोपलब्धेः ॥ नोपमर्देनातः ॥ अस्यैवचोपपत्तेः ॥५॥
प्रतिषेधादितिचेन्नशारीरात् ॥ स्पष्टोह्येकेषां ॥ स्मर्यतेच ॥६॥ तानि
परेतथाह्याह ॥७॥ अविभागोवचनात् ॥८॥ तदोकोग्रज्वलनंतत्प्र
त काशिंद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृत्यनुस्मृतियोगाच्चहार्दा
नुगृहीतःशताधिकया ॥ इतरेतुस्थानांतरेभ्यः ॥९॥ रश्मनुसा
री ॥१०॥ अतश्चायनेपिदक्षिणे ॥ योगिनःप्रतिचस्मर्यतेस्मा राम
र्तेचैते ॥११॥ इतिब्रह्मसूत्रेचतुर्थेद्वितीयःपादः ॥ ॥ अर्चिरादि १५
नातत्प्रथितेः ॥१॥ वायुशब्दादविशेषविशेषाभ्यां ॥२॥ तडितोधि
वरुणःसंबंधात् ॥३॥ आतिवाहिकास्तल्लिंगात् ॥ उभयव्यामोहात्त

।त्सिद्धेः॥वैद्युतेनैवततस्तच्छ्रुतेः॥४॥कार्यंवादरिरस्यगत्युपपत्तेः॥
विशेषितत्वात्॥सामीप्यात्तुतद्व्यपदेशः॥कार्यात्ययेतदध्यक्षेण
सहतःपरमभिधानात्॥स्मृतेश्च॥परंजैमिनिर्मुख्यत्वात्॥नच
कार्येप्रतिपत्त्यभिसंधिः॥५॥अप्रतीकालंबनान्नयतीतिबाद
रायणउभयथादोषात्तत्क्रतुश्च॥विशेषंचदर्शयति॥६॥इतिब्रह्म
सूत्रेचतुर्थेतृतीयःपादः॥ ॥संपद्याविर्भावःस्वेनशब्दात्॥मुक्तः
प्रतिज्ञानात्॥आत्माप्रकरणात्॥१॥अविभागेनदृष्टत्वात्॥२॥
ब्राह्मेणजैमिनिरुपन्यासादिभ्यः॥चितितन्मात्रेणतदात्मकत्वा
दित्यौडुलोमिः॥एवमप्युपन्यासात्पूर्वभावादविरोधंबादरायणः॥३॥

संकल्पादेवतुतच्छ्रुतेः ॥ अतएवचानन्याधिपतिः ॥ ४ ॥ अभावंबादरिरा
हह्येवं ॥ भावंजैमिनिर्विकल्पामननात् ॥ द्वादशाहवदुभयविधंबादराय
णोतः ॥ तन्वभावेसंध्यवदुपपत्तेः ॥ ५ ॥ प्रदीपवदावेशस्तथाहिदर्श
यति ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंहि ॥ ६ ॥ जगद्व्यापार
वर्जंप्रकरणादसंनिहितत्वाच्च ॥ प्रत्यक्षोपदेशादितिचेन्नाधिकारि
कमंडलस्थोक्तेः ॥ विकारावर्त्तिचतथाहिस्थितमाहेति ॥ दर्शयतश्चैवं
प्रत्यक्षानुमाने ॥ भोगमात्रसाम्यलिंगाच्च ॥ अनावृत्तिःशब्दादनावृ
त्तिःशब्दात् ॥ ॥ इतिब्रह्मसूत्रस्यचतुर्थाध्यायः समाप्तः ॥ ॥ ७

राम
१६

तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशात्॥९॥इतरस्या
प्येवमसंश्लेषःपातेतु॥१०॥अनारब्धकार्येएवतुपूर्वेतदवधे
तेः॥११॥अग्निहोत्रादीतुतत्कार्यायैवतद्दर्शनात्॥अतोन्यापि
ह्येकेषामुभयोः॥१२॥यदेवविद्ययेतिहि॥१३॥भोगेनत्वितरेक्ष
पयित्वासंपद्यते॥१४ इतिब्रह्मसूत्रेचतुर्थाध्यायेप्रथमःपादः॥ ॥ॐ
वाङ्मनसिदर्शनाच्छब्दाच्च॥अतएवसर्वाण्यनु॥१॥तन्मनःप्राणउ
त्तरात्॥२॥सोध्यक्षेतदुपगमादिभ्यः॥भूतेषुतच्छ्रुतेः॥नैकस्मिन्
दर्शतोहि॥३॥समानाचासृत्युपक्रमादमृतत्वंचानुपोष्य॥४॥तदापी
तेःसंसारव्यपदेशात्॥सूक्ष्मंप्रमाणश्चतथोपलब्धेः॥नोपमर्देनातः॥

अस्यैवचोपपत्तेः ॥ ५ ॥ प्रतिषेधादितिचेन्नशारीरात् ॥ स्पष्टोह्येकेषां ॥
स्मर्यतेच ॥ ६ ॥ तानिपरेतथाह्याह ॥ ७ ॥ अविभागोवचनात् ॥ ८ ॥ तदेको
ग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुष्टत्यनुस्मृति
योगाच्चहार्दनुगृहीतः शताधिकया ॥ इतरेतुरखानंतरेभ्यः ॥ ९ ॥ रश्म्यनु
सारी ॥ १० ॥ अतश्चायनेपिदक्षिणे ॥ योगिनः प्रतिचस्मर्यतेस्मार्तेचैते
॥ ११ ॥ इतिब्रह्मसूत्रेचतुर्थेद्वितीयः पादः ॥ ॥ अर्चिरादिनातत्प्रथितेः ॥ १ ॥
वायुशब्दादविशेषविशेषाभ्यां ॥ २ ॥ तडितोधिवरुणः संबंधात् ॥ ३ ॥ अति
वाहिकास्तल्लिंगात् ॥ उभयव्यामोहात्तत्सिद्धेः ॥ वैधुतेनैवततस्तच्छ्रुतेः ॥
॥ ४ ॥ कार्यंबादरिरस्यगत्युपपत्तेः ॥ विशेषितत्वात् ॥ सामीप्यात्तुतद्व्य

राम
१५

33

पदेशाः॥कार्यात्ययेतदध्यक्षेणसहतःपरमभिधानात्॥स्मृतेश्च॥
परंजैमिनिर्मुख्यत्वात्॥नचकार्येप्रतिपत्त्यभिसंधिः॥५॥अप्रती
कालंबनान्नयतीतिबादरायणउभयथादोषात्तत्क्रतुश्च॥विशेषं
चदर्शयति॥६॥इतिब्रह्मसूत्रेचतुर्थेतृतीयःपादः॥ ॥संपद्या
विर्भावःस्वेनशब्दात्॥मुक्तःप्रतिज्ञानात्॥आत्माप्रकरणात्॥१॥
अविभागेनदृष्टत्वात्॥२॥ब्राह्मेणजैमिनिरुपन्यासादिभ्यः॥चि
तितन्मात्रेणतदात्मकत्वादित्यौडुलोमिः॥एवमप्युपन्यासात्पू
र्वभावादविरोधंबादरायणः॥३॥संकल्पादेवतुतच्छ्रुतेः॥अतए
वचानन्याधिपतिः॥४॥अभावंबादरिराहह्येवं॥भावंजैमिनिर्वि

कल्पामननात्॥द्वादशाहवदुभयविधंबादरायणोतः॥नन्वभावेसंध्यवदुपपत्तेः॥५॥प्रदीपवदावेशास्तथाहिदर्शयति॥स्वाप्ययसंपत्योरन्यतरापेक्षमाविष्कृतंहि॥६॥जगद्व्यापारवर्जंप्रकरणाद्संनिहितत्वाच्च॥प्रत्यक्षोपदेशादितिचेन्नाधिकारिकमंडलस्थोक्तेः॥विकारावर्त्तिचतथाहिस्थितिमाहेति॥दर्शयतश्चैवंप्रत्यक्षानुमाने॥भोगमात्रसाम्यलिंगाच्च॥अनावृत्तिःशब्दादनावृत्तिःशब्दात्॥ ॥इतिब्रह्मसूत्रस्यचतुर्थोध्यायःसमाप्तः॥ ॥छ

KKSU LIBRARY
RAMTEK 441 106
Dist. Nagpur
M-1764

```
[OrderDescription]
,CREATED=21.10.20 11:19
,TRANSFERRED=2020/10/21 at 11:24:15
,PAGES=35
,TYPE=STD
,NAME=S0004278
,Book Name=M-1744-BRAHAMSUTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

```
FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,
```